दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-279

1

जुलाई 29, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लपूर्णिमा
श्रावण 13 प्रविष्ठांशः मङ्गलमयः भवेत्

2 रामजन्मभूमि-मन्दिर-समर्पणराशि-चौर्ये नवीन-एसआईटी-गठनम्, सर्वोच्चन्यायालयः स्थितिप्रतिवेदनम् अयाचत

3 HIMACHAL RAIN - चम्बायां नदी-उपनद्यः आप्लाविता:; प्लावेन ६४ गृहाणि अष्ट आपणानि च क्षतिग्रस्तानि, २२ वाहनानि मलिनावशेषे निमग्नानि

5 "गुरुपौर्णिमा विशेषः" गुरुः
{१} गिरत्यज्ञानमिति- अज्ञानं हरति।
{२}गृणाति धर्ममिति- यः धर्मोपदेशं करोति।
{३} गिर्यते इति- यस्य स्तुतिः गीयते।

## सर्वोच्च न्यायालयः अष्टादश-वर्षादूनानां आपराधिक-हीनानां छात्र-प्रदर्शनकारिणां सद्यः मुक्तेः निर्देशम् प्रायच्छत्



सर्वोच्च न्यायालयः प्रावोचत् यत् नीट्-प्रश्नपत्र-गोप्यताभङ्गे देशव्यापि-विरोध-प्रदर्शनावधौ छात्राणां अथ च आरक्षकाणां क्षतेः आरोपेषु काचित् गभीरा, तटस्था च अन्वेषणप्रक्रिया आवश्यकी वर्तते। एतदतिरिच्य न्यायालयेन विरोध-प्रदर्शनावधौ निगडिताः आपराधिक पृष्ठभूमिहीनाः अल्पवयस्काः छात्राः तत्क्षणं मोचयितुं प्रादिश्यत । न्यायालयेन प्रदर्शन-सम्बद्धानां साक्ष्याणां रक्षणाय अपि आदेशो प्रदत्तः । मुख्य-न्यायाधीशस्य सूर्य-कान्तस्य अध्यक्षतायां न्यायपीठेन प्रदर्शनावधौ छात्राणामुपरि आरक्षकाणां अत्यधिक बल प्रयोगस्य वादश्रवणं विहितम् । शीर्ष न्यायालयः न्यगादीत् यत् अस्याम् अन्वेषण-प्रक्रियायां द्विशताधिकानां क्षत-विक्षतारक्षकाणां परिवारस्यापि चिन्ताः अपि समाहिताः भवेयुः। पीठेन दिल्ली-सर्वकाराय पञ्जीकृतानां प्राथमिकीनां अन्वेषणं निरन्तरं कर्तुं अनुमतिः प्रदत्ता, किन्तु स्पष्टीकृतं यत् यावत् प्रकरणं विचाराधीनम् वर्तते, तावत् पात्र-छात्रेषु किमपि कठोर कार्याचरणं न भवेत्। एतदतिरिच्य सर्वोच्च न्यायालयेन दिल्ली-महाराष्ट्र-बिहार- केरल मध्यप्रदेश-उत्तरप्रदेशानां मुख्य-सचिवेभ्यः याचिकासु कृतानां आरोपाणां प्रत्युत्तरं समाहूतम्।

## जापान- : कुमामोटो-प्रान्ते ७.१ तीव्रतायाः शक्तिशाली भूकम्पः, सुनामी-चेतावनी च निर्गता



टोक्यो। मङ्गलवासरे जापानदेशस्य दक्षिण-पश्चिम-क्यूशू-क्षेत्रस्य कुमामोटो-प्रान्ते ७.१ तीव्रतायाः शक्तिशाली भूकम्पः आगतः। जापान-देशस्य भूकम्पीय-तीव्रता-मापने अस्य तीव्रता अधिकतम-स्तरे 'शिन्दो-७' इति अङ्किता। तदनन्तरम् ऋतु-विज्ञान-संस्थया अरियाके-यात्सुशिरो-सागरयोः तटीय-क्षेत्रेभ्यः सुनामी-चेतावनीं निर्गम्य जनाः समुद्रतटेभ्यः दूरे तिष्ठेयुः इति प्रार्थना कृता। जापान-ऋतु-विज्ञान-संस्थानस्य अनुसारं, भूकम्पात् झटिति परमेव एतेषु समुद्री-क्षेत्रेषु सुनामी-तरङ्गस्य प्रथमप्रहारस्य सम्भावना व्यक्ता कृता, अग्रे अपि अन्यासाम् वीचीनाम् (तरङ्गाणाम्) आगमनस्य शङ्का अस्ति। यात्सुशिरो, उटो, माशिकी, मिसातो तथा कुमामोटो-नगरस्य मिनामी-वर्गे शिन्दो-मापके तीव्रता-६ (तीव्राः) प्रकम्पनानि अनुभूतानि, जबकि कुमामोटो-प्रदेशस्य अन्यभागेषु तथा नागासाकी, कागोशिमा, फुकुओका, सागा, मियाजाकी-प्रान्तेषु अपि तीव्राः कम्पनाः अङ्किताः। स्थानीय-प्रसारमाध्यमानाम् अनुसारम्, भूकम्पस्य केन्द्रं कुमामोटो-नगरस्य दक्षिणदिशि स्थितस्य उकी-नगरस्य समीपे १० किलोमीटर-गभीरतायाम् आसीत्। क्यूशू-इलेक्ट्रिक-संस्थया उक्तं यत् भूकम्पानन्तरं कुमामोटो-प्रान्ते प्रायः ४५,६०० गृहेषु विद्युत्-आपूर्तिः बाधिता अभवत्। उल्लेखनीयम् अस्ति यत् अप्रैल-२०१६ मे अपि कुमामोटो-क्षेत्रे आगतयोः द्वयोः भीषण-भूकम्पयोः २७८ जनाः मृताः अभवन्, २,८०० तः अधिकाः जनाः व्रणिताः च अभवन्। तयोः भूकम्पयोः कुमामोटो-दुर्गस्य (कैसल) अपि महती क्षतिः अभवत्, यस्य पुनर्निर्माणकार्यम् २०५२ तम-वर्षपर्यन्तं पूर्णं भवितुम् आशा अस्ति।

## एयर-इण्डिया-संस्थया अमृतसर-विमानपत्तने ईज़ी कनेक्ट इति हब्-एण्ड-स्पोक्-प्रतिरूपं प्रवर्तितम्, अनेन तावत् पञ्जाब-राज्यं सप्तविंशति-अन्ताराष्ट्रिय गन्तव्यैः सह योक्ष्यते



अमृतसर-अन्ताराष्ट्रिय विमानपत्तने एयर इण्डिया-संस्थायाः ईजी कनेक्ट हब-एण्ड-स्पोक्-प्रतिरूपस्य शुभारम्भेण सह पञ्जाब-राज्यम् उत्तर-अमेरिका- यू.के.-यूरोप-ऑस्ट्रेलियादेशैः सह सप्तविंशति-अन्ताराष्ट्रिय गन्तव्यैः साकं सम्बद्धमभवत्। अस्याः योजनायाः समारम्भेण अमृतसर-विमानपत्तनतः प्रतिदिनं वे ईजी कनेक्ट-उड्डयने सञ्चालिते भविष्यतः। आभासीय माध्यमेन जनसमूहं सम्बोधयन् नागरिक-विमानन-मन्त्री के. राम-मोहन-नायडुः अब्रवीत् यत्, प्रतिवर्षं सार्धैक-लक्ष-यात्रिणः अन्ताराष्ट्रिय-उड्डयनानि सम्पादयितुं अमृतसरतः दिल्ली-नगरं गच्छन्तीति तथ्याङ्काः दर्शयन्ति । तेनोदीरितं यत् एतस्मात् हब-एण्ड स्पोक्-प्रतिरूपात् त्रिंशदधिक-द्विसहस्रतमवर्षं यावत् चतुर्लक्षाधिकाः नूतन-वृत्त्यवसराः सहैव त्रिंशत्-अरब्ब-डॉलरपरिमितम् आर्थिक-गतिविधयश्च भविष्यन्तीति सम्भाव्यते।



## झारखण्ड-राज्ये षड्भिः प्रमुख-गणनायकैः सह षोडश माओवादिनः सुरक्षा-बलानां समक्षम् आत्मसमर्पणम् अकुर्वन्

झारखण्ड्-राज्यस्य 'नयी दिशा-नयी पहल' इति नक्सल्-विरोधी अभियानेन अद्य महत् साफल्यं प्राप्तम्, कोल्हान-लातेहार क्षेत्रयोः षोडश सक्रियाः माओवादिनः राञ्ची-नगरे आरक्षकाणां समक्ष आत्मसमर्पणं कृतवन्तः । आत्मसमर्पणं कर्तृषु षट्जनाः प्रमुखाः दलसेनापतयः सन्ति। आरक्षि-महानिदेशकः तदाशा मिश्रः अवदत् यत् शरणागताः माओवादिनः राज्यसर्वकारस्य पुनर्वसननीतेः लाभान् प्राप्नुयुः।

## सुभाषितम्

**यथा व्यवहरन्ति सन्तो,**
**यथा च प्रभवन्ति च।**
**तथा व्यवहरेन्मर्त्यः,**
**स च धर्मः सनातनः॥**
**(महाभारत, अनु. पर्व १०४/०७)**

अर्थात्- संसार के श्रेष्ठ और सज्जन पुरुष दूसरों के साथ जैसा श्रेष्ठ व्यवहार करते हैं और अपनी शक्ति का उपयोग जैसे लोक- कल्याण के लिए करते हैं, अन्य मनुष्यों को भी समाज में वैसा ही आचरण करना चाहिए। सज्जनों के व्यवहार का अनुसरण करना ही 'सनातन धर्म' युक्त सदाचार है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सर्वकारेण अष्टादश-राज्येषु केन्द्रशासित प्रदेशेषु च साइबर अपराध-प्रकरणेषु ई-शून्य-एफ.आई.आर पञ्जीकरण प्रणाली प्रवर्तिता

सर्वकारेण अष्टादश-राज्येषु केन्द्रशासित प्रदेशेषु च साइबर अपराधमालक्ष्य ई-शून्य-एफ.आई.आर-पञ्जीकरणस्य नूतना काचित् व्यवस्था प्रवर्तिता। गृह राज्यमन्त्री बन्दी-सञ्जय-कुमारः सूचितवान् यत् अस्मिन् ई-शून्य-एफ.आई.आर-तन्त्रे द्वादश-सहस्राधिकानि प्रकरणानि एतावता पञ्जीकृतानि ।

# रामजन्मभूमि-मन्दिर-समर्पणराशि-चौर्ये नवीन-एसआईटी-गठनम्, सर्वोच्चन्यायालयः स्थितिप्रतिवेदनम् अयाचत



अयोध्यायां रामजन्मभूमि-मन्दिर-न्यासेन (ट्रस्ट) प्राप्तस्य समर्पणधनस्य चौर्यप्रकरणे

सोमवासरे सर्वोच्चन्यायालयस्य (सुप्रीम कोर्ट) समक्षम् उत्तरप्रदेशसर्वकारस्य पक्षं उपस्थापयन् सॉलिसिटर जनरल तुषार मेहता अवदत् यत् प्रकरणस्य पारदर्शिशोधनाय (निष्पक्षजांच) पुनः नूतना एसआईटी (विशेषतपासदलम्) गठिता अस्ति। सर्वोच्चन्यायालयस्य पूर्वनिर्देशानां अनुपालनं कुर्वद्भिः अस्याः नूतनायाः एसआईटी-संस्थायाः कमानम् वरिष्ठेभ्यः अधिकारिभ्यः समर्पितम्। लखनऊ-क्षेत्रस्य आरक्षि-महानिरीक्षकः (आईजी) किरण एस अस्याः एसआईटी-संस्थायाः प्रमुखः नियुक्तः अस्ति। त्रिपाठिके (त्रिस्तरीय) एसआईटी-दले आईजी-किरण एस महोदयात् अतिरिच्य द्वौ अपरौ वरिष्ठौ आईपीएस-अधिकारिणौ सम्मिलितौ स्तः। एतयोः अयोध्या-क्षेत्रस्य उप-आरक्षि-महानिरीक्षकः (डीआईजी) सोमेन वर्मा, अयोध्यायाः वरिष्ठ-आरक्षि-अधीक्षकः (एसएसपी) गौरव ग्रोवर च शामिलौ स्तः। प्रधानन्यायाधीशः सूर्यकान्तः, न्यायाधीशः जॉयमाल्य बागची, न्यायाधीशः वी मोहना च एतेषां पीठेन अस्मिन् अन्तरे परामर्शः दत्तः यत् वित्तीय-अनियमितानाम् अन्वेषणाय अस्मिन् दले कश्चन सनदी-लेखाकारः (चार्टर्ड अकाउंटेंट) अपि सम्मिलितः भवेत्। न्यायालयस्य एतस्मिन् परामर्शे सॉलिसिटर जनरल तुषार मेहता सहमतिं प्रकटितवान्, न्यायालयं च आश्वस्तवान् यत् एसआईटी-दले एकः सनदी-लेखाकारः अपि नियोजिष्यते।न्यायालयः अन्वेषणस्य स्थितिप्रतिवेदनं (स्टेटस रिपोर्ट) उपस्थापयितुम् निर्देशम् अयच्छत्। विचारणाकाले याचिकाकर्तुः अधिवक्त्रा न्यायालये याचना कृता यत् राममन्दिर-न्यासेन प्राप्ताः सर्वाः रसीद-पत्र्यः क्षेत्रवारं जालपुटे (वेबसाइट) सार्वजनिकीक्रियेरन्, येन सामान्याः जनाः अस्याः सर्वां सूचनां प्राप्नुयुः। सः अवदत् यत् एषा काचित् विरोधात्मका याचिका नास्ति, अपि तु पारदर्शितायै आवश्यकी अस्ति। याचिकाकर्तृणां पक्षतः वरिष्ठ-अधिवक्ता देवदत्त कामतः अवदत् यत् सम्पूर्णदेशात् जनाः शतम्, पञ्चशतम्, सहस्रं वा रूप्यकाणि ददति। तेषां विवरणमपि न्यासस्य जालपुटे भवेत्। अत्र सॉलिसिटर जनरल तुषार मेहता याचिकाकर्तुः अस्य परामर्शस्य विरोधम् अकरोत्, अवदत् च यत् अस्मिन् संवेदनशीले प्रकरणे विना कारणं खळभळः (सनसनी) न उत्पादनीयः। सम्प्रति सर्वोच्चन्यायालयेन उत्तरप्रदेशसर्वकारेण गणितायाम् एसआईटी-संस्थायां नियुक्ताः त्रयः आईपीएस-अधिकारिणः अभिलेखेषु (रिकॉर्ड पर) गृहीताः। सहैव न्यायेन स्वकीय-आदेशे उक्तं यत् अग्रिमायां विचारणायां अस्मिन् प्रकरणे एसआईटी स्वकीय-अन्वेषणस्य स्थितिप्रतिवेदनम् उपस्थापयिष्यति। अस्य प्रकरणस्य अग्रिमा विचारणा अधुना सप्ताहद्वयानन्तरं भविष्यति।

# संवृत्ते कोलाहले राज्यसभायाः कार्याचरणं आदिनाय स्थगितम्, अपरत्र लोकसभायां परीक्षा-पत्र-प्रकटन-विरोधि-संशोधन विधेयकम् आलक्ष्य सञ्जातः विचार-विमर्शः



हिमसंस्कृतवार्ता नवदेहली। नीट्परीक्षा-प्रकरणे छात्र-प्रदर्शनकाले आरक्षकाणां कार्याचरणमधिकृत्य विरोधं कुर्वतां विपक्षी-दलानां कोलाहलेन राज्यसभायाः कार्यजातम् आदिनाय स्थगितम् । गतदिने अपराह्णे द्विवादने प्रथम-स्थगनात् परं यदा उच्चसदनं समवेतम्, तदा सूक्ष्म-लघु-मध्यमोद्यम-मन्त्री जीतन राम मांझी इत्यमुना सूक्ष्म लघु-मध्यमोद्यम-विकास-संशोधन विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं सदने उपस्थापितम् । एतस्य विधेयकस्य उद्देश्यम् सूक्ष्म-लघु-मध्यमोद्यम-विकास-अधिनियमे षडाधिक-द्विसहस्रतमे संशोधनं इत्यस्ति। विधेयक उपस्थापनकाले एव विपक्षी-सदस्याः छात्रेषु कृतायाः आरक्षक-क्रियायाः विरोधं कुर्वन्तः पुनः पीठस्य पुरतः आगत्य उच्चैः विरोधोद्घोषान् अकुर्वन्। अविरत-कोलाहलं दृष्ट्वा उपसभापतिः हरिवंशः सदनस्य कार्याचरणं श्वः प्रातः एकादशवादनं यावत् अस्थगयत्

## लोकसभा-सार्वजनिकपरीक्षा

लोकसभायां सार्वजनिकपरीक्षा (अनुचितसाधनानां निवारणम्) संशोधन-विधेयकम् विंशति-षड्विंशतिः इति चर्चायै स्वीकृति प्रदानाय च उपस्थापितम्। विधेयकः सार्वजनिक-परीक्षा (अनुचित साधन निवारण) अधिनियमः, विंशति-चतुर्विंशतिः अस्मिन् विधयके अनेकानि महत्त्वपूर्णानि उपबन्धानि सन्ति, यथा दशवर्षपर्यन्तं कारावासः, दशकोटिरूप्यकाणि यावत् दण्डः, अपराधिनां सम्पत्तयः अभिगृहीतव्यानि च। विधेयकम् उपस्थापयन् कार्मिक-लोक-परिवाद-निवृत्तिवेतन-राज्यमन्त्री डा. जितेन्द्रसिङ्ह-वर्यः अवदत् यत्, नूतनं विधानम् अस्य देशस्य छात्राणां तथा यूनां कल्याणार्थ सर्वकारस्य सुदृढाम् प्रतिबद्धतां पुनः दृढीकरोति। डा. सिङ्घः अवदत् यत् सद्यः एव पेपर लीक् इति घटनायाः अवधानं स्वीकृत्य प्रधानमन्त्रिणा स्वयमेव निर्णयः कृतः यत् दुराचारान् निवारयितुं विधि-संरचनायाः सुदृढीकरणस्य आवश्यकता अस्ति।चर्चायां भागम् भजन, काङ्ग्रेस्-दलस्य गौरव गगोयी इत्येषः, प्रत्यारोपितवान् यत् सर्वकारः शिक्षाक्षेत्रस्य विषये गम्भीरः नास्ति, वास्तविक परिष्कारान् आनेतुं न इच्छति इति । संदर्भेस्मिन् चर्चा अधुनापि प्रचलति।

# किन्नौर-कैलाश-यात्रायाः अन्तर्जाल-पुटकानि चतुर्षु होरासु आरक्षितानि, साक्षात् (ऑफलाइन) पञ्जीकरणम् आरब्धम्



**हिमसंस्कृतवार्ताः - शिमला।** किन्नौर-कैलाश-यात्रा ३० जुलाई-दिनाङ्कतः प्रारभते, अस्य कृते पञ्जीकरणविधानं अनिवार्यं वर्तते। प्रशासनेन मङ्गलवासरस्य प्रातः १० वादने उद्घाटिते अन्तर्जाल-पञ्जीकरण-द्वारे (ऑनलाइन पोर्टल) ४ अगस्त-दिनाङ्कं यावत् सर्वाणि पुटकानि (स्लॉट) केवलं चतुर्षु होरासु एव आरक्षितानि (बुक) संजातानि। अधुना भक्ताः साक्षात् (ऑफलाइन) पञ्जीकरणं कारयितुं शक्नुवन्ति अथवा ५ अगस्त-दिनाङ्के पुनः पुटस्य (पोर्टल) उद्घाटनस्य प्रतीक्षां कर्तुं शक्नुवन्ति। अन्तर्जाल-पञ्जीकरण-द्वारे प्रतिफलं १७५ भक्तानां कृते पुटकानि उपलब्धानि आसन्। यात्रां गन्तुम् इच्छन्तः भक्ताः ३० जुलाई-दिनाङ्के प्रातः षड्वादने ताङ्गलिंग-क्षेत्रे पञ्जीकरण-शिविरे प्रतिवेदनं (रिपोर्ट) कृत्वा साक्षात् (ऑफलाइन) पञ्जीकरणं कारयितुं शक्नुवन्ति। एकस्मिन् दिने केवलं १२५ साक्षात् पञ्जीकरणानि करिष्यन्ते, अवशिष्टाः ७५ आसन्दाः (सीटें) 'एडवेंचर टूर ऑपरेटर्स एसोसिएशन किन्नौर' इत्यस्य अंशाय (कोटे के लिए) आरक्षिताः सन्ति। प्रशासनेन प्रतिदिनं केवलं ३७५ भक्तेभ्यः एव यात्रायाः अनुमतिः दत्ता। किन्नौर-कैलाश-यात्रा-समित्याः अध्यक्षः कल्पा इत्यस्य उपमण्डलाधिकारी (एसडीएम) प्रवीणभारद्वाजः ज्ञापितवान् यत् ४ अगस्त-दिनाङ्कं यावत् सर्वाणि अन्तर्जाल-पुटकानि आरक्षितानि अभवन्। तेन भक्तैः शारीरिकरूपेण स्वस्थैः भूत्वा एव यात्रां कर्तुं प्रार्थना कृता।

## वैद्यकीय-आरोग्यता अनिवार्या,

## यात्रायै महत्वपूर्ण-दिशा-निर्देशाः

प्रशासनेन किन्नौर-कैलाश-यात्रायै सर्वेषां यात्रिणां कृते वैद्यकीय-आरोग्यता-प्रमाणपत्रं (चिकित्सा फिटनेस प्रमाण पत्र) अनिवार्यं कृतम् अस्ति। एतत् पदं यात्रां सुरक्षितां सुव्यवस्थितां च विधातुं धिया गृहीतम्। यात्रिणः स्वक्षेत्रस्य कस्मात् अपि पञ्जीकृत-वैद्यकीयाधिकारिणः (चिकित्सा अधिकारी) प्रमाणपत्रं प्राप्तुं शक्नुवन्ति। पञ्जीकरण-प्रमाणपत्रं यात्रायाः समये स्वसमीपे स्थापनीयं भविष्यति।
प्रशासनेन समूहे यात्रां कर्तुं स्थानीय-मार्गदर्शकानां (गाइडों) निर्देशानां पालनं कर्तुं च प्रार्थना कृता। उच्च-क्षेत्रेषु मन्दं-मन्दं आरोहन्तु, असौकर्ये (असुविधा) सति सद्यः विश्रामं कुर्वन्तु। उष्ण-वस्त्राणि, वर्षिकां (रेनकोट), सुदृढान् पादत्राणान् (ट्रेकिंग जूते) आवश्यकीः औषधीः च सह स्थापयन्तु। केवलं निर्धारितानां यात्रामार्गाणाम् उपयोगं कुर्वन्तु, स्वच्छतां च रक्षन्तु। रात्रौ यात्रां कर्तुम्, अवकर-प्रक्षेपणात् तथा नशीलानामौषधीनां सेवात् विरमन्तु।

# HIMACHAL RAIN - चम्बायां नदी-उपनद्यः आप्लाविताः; प्लावेन ६४ गृहाणि अष्ट आपणानि च क्षतिग्रस्तानि, २२ वाहनानि मलिनावशेषे निमग्नानि



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**

ऋतुविज्ञानविभागस्य पीतसतर्कतायाः मध्ये हिमाचलप्रदेशस्य चम्बायां सोमवासरे चिररात्रौ भृशवृष्टिः अभवत्। मूसलाधारवृष्टेः अनन्तरं चम्बायां तस्य पार्श्ववर्तिषु क्षेत्रेषु च त्रिषु उपनदीषु आगतेन प्लावेन (बाढ़) तड़ोली, सुल्तानपुरं, ओबड़ी, भरियाठ, घोल्टी इति क्षेत्रेषु विनाशः कृतः। प्लावेन एतेषु क्षेत्रेषु ६४ गृहाणाम् अतिरिच्य अष्ट आपणानि एकं भण्डारगृहं (गोदाम) च क्षतिग्रस्तम् अभवत्। गृहेषु आपणेषु च जलं मलिनावशेषः च प्राविशत्, येन बहवः परिवाराः रात्रावेव गृहाणि त्यक्त्वा सुरक्षितानि स्थानानि प्रति आश्रयं ग्रहीतुं विवशाः अभवन्। १६ कार-वाहनानि, पञ्च द्विचक्रिकाः (बाइक) एका स्कूटी च मलिनावशेषस्य व्याप्तौ आगताः। बहुषु स्थानेषु गृहाणाम् अङ्गनेषु प्रकोष्ठेषु (कमरों) च मलिनावशेषः आपूरितः।

### राज्ये १७९ मार्गाः १०७ पेयजल-योजनाः च स्थगिताः

घटोला, नाड़ू, तड़ोली इति उपनदीषु आगतेन तीव्रप्रवाहेन उर्वरा भूमिः, गोशालाः, वैयक्तिकसम्पत्तिः च अपि क्षतिं प्राप्ताः। प्रशासनेन प्रभावितेभ्यः परिवारेभ्यः तात्कालिकसहायतारूपेण पञ्चाशत्-पञ्चाशत्-सहस्रं (५०-५० हजार) रूप्यकाणि प्रदत्तानि। मङ्गलवासरस्य सायङ्कालपर्यन्तं सम्पूर्णप्रदेशे १७९ मार्गाः, ६२ विद्युत्-परिवर्तकाः, १०७ पेयजल-योजनाः च पिहिताः आसन्। ऋतुविज्ञानविभागेन चम्बा, काङ्गड़ा, कुल्लू, मण्डी, शिमला, सिरमौर, सोलनम् इति जनपदेषु आगामिनि दिनद्वये जलप्लावनस्य सचेतना कृता। भृशवृष्टेः जलप्लावनस्य च सम्भावनां विलोक्य नाहन-उपमण्डले बुधवासरे सर्वाणि शिक्षणसंस्थानानि पिधातुं निर्णयः गृहीतः। पांवटा-क्षेत्रे मङ्गलवासरे विद्यालयाः निरुद्धाः आसन्।

### शिमलायां स्थाने-स्थाने वृक्षाः अपतन्

राजधान्यां शिमलायां सोमवासररात्रौ झमाझम-वृष्टिः अभवत्। मङ्गलवासरस्य प्रातःकाले लिफ्ट-समीपे पर्वतात् भूस्खलनकारणात् सर्कुलर-मार्गः कतिपयघण्टाः यावत् अवरुद्धः तस्थौ। नगरे उपनगरेषु च वृक्षाणां पतनेन तटबन्ध-भङ्गेन च पीडा वर्धिता। विकृतर्तुकारणात् दिल्लीतः धर्मशालां आगच्छन्त्यः तिस्रः वैमानिकसेवाः (उड़ानें) मङ्गलवासरे निरस्ताः कृताः। रेलसेवाः अपि प्रभाविताः अभवन्। सिरमौर-जनपदे मङ्गलवासरे वृष्टि-भूस्खलनाभ्यां बहुषु मार्गेषु गमनागमनं बाधितम् आसीत्। निरन्तरवृष्ट्या पर्वतीयक्षेत्रेषु भूस्खलनस्य मलिनावशेषस्य च आगमनांशङ्का वर्तते।

### आरक्षकैः सर्वे सुरक्षिताः बहिः निष्कासिताः

अपरतः, चम्बायां मणिमहेशयात्रातः प्रत्यागच्छन्तः हैदराबादस्य पञ्च भक्ताः सोमवासररात्रौ गुई-उपनदस्य समीपे भूस्खलनकारणात् अवरुद्धाः अभवन्। रात्रौ रक्षण-अभियानं (रेस्क्यू) चालयित्वा आरक्षकैः (पुलिस) सर्वे सुरक्षिताः बहिः निष्कासिताः।कुल्लू-जनपदस्य सैंज-घाटी-क्षेत्रस्य रोपा-शांघड़-मार्गः अवसीदितः, येन वाहनानां गमनागमनं स्थगितम्। अनेन पर्यटकानां त्रिंशतः (३०) अधिकानि वाहनानि अवरुद्धानि संजातानि। फलैः शाकैः च पूर्णानि वाहनानि अपि पतितानि सन्ति। मण्ड्यां पठानकोट-राष्ट्रीयराजमार्गे-१५४ कोटरोपी-समीपे नवीनः मार्गः मङ्गलवासरसायङ्काले सहसैव अवसीदितुम् आरब्धः। भूमेः अवसीदनेन भूस्खलनस्य यातायात-बाधायाः च सङ्कटः वर्धितः। प्रशासनेन अस्मिन् मार्गे भारीवाहनानां गमनागमनं सद्यः प्रभावेन निषिद्धं कृतम्।

# मृत-अविवाहित-पुत्रस्य मातुः पक्षे उच्चन्यायालयस्य महत् निर्णयम्, १३ लक्षरूप्यकाणां क्षतिपूर्तिः मिलिष्यति




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-उच्चन्यायालयः मार्गदुर्घटनायां प्राणां त्यक्तवतः एकस्य अविवाहित-युवकस्य मातुः पक्षे महत् निर्णयं श्रावितवान्। न्यायेन 'मोटर एक्सीडेंट क्लेम्स ट्रिब्यूनल' इति अधिकरणेन निर्धारितां ७,१९,००० रूप्यकाणां क्षतिपूर्तिराशिम् अपर्याप्ताम् अमन्यत्। न्यायालयः विधिकसिद्धान्तान् भविष्यत्-सम्भावनाः च आधारिकृत्य एतां क्षतिपूर्तिं संवर्ध्य १३,०२,७७० रूप्यकाणि कर्तुम् आदेशान् प्रसारितवान्। न्यायाधीशस्य सुशीलकुकरेजा वर्यस्य एकलपीठेन याचिकाकर्त्र्याः मातुः सत्यदिल्टा-वर्यायाः पक्षतः संस्थापितायाम् याचिकायाम् एषः निर्णयः श्रावितः। प्रकरणस्य विवरणानुसारं ८ नवम्बर २०११ दिनाङ्के याचिकाकर्त्र्याः २३ वर्षीयः पुत्रः मोहितदिल्टा खलीनी-क्षेत्रात चण्डीगढ़-नगराभिमुखं गन्तुं स्कोर्पियो-वाहने आरूढः जातः। कनलोगस्य समीपे चालकस्य असावधानेन तीव्रगत्या च वाहनम् अनियन्त्रितं भूत्वा गभीरे गर्ते अपतत्। अस्यां भीषण-दुर्घटनायां मोहितदिल्टा तथा वाहनस्य चालकः उभौ घटनास्थले एव मृतवन्तौ। अस्मात् परं पीडिता माता अधिकरणे (ट्रिब्यूनल) ५० लक्षरूप्यकाणां क्षतिपूर्त्यै याचनां कृतवती आसीत्। श्रवणकाले उच्चन्यायालयः अपश्यत् यत् अधिकरणेन क्षतिपूर्तेः गणनावेलायां बह्व्यः विधिकत्रुटयः कृताः आसन्। अधिकरणेन मृतस्य मासिकी आयः केवलं ६,००० रूप्यकाणि अङ्किता आसीत्। उच्चन्यायालयः अमन्यत यत् मृतः एकः उद्यानपालकः (बागवान) कृषकः च आसीत्। २०११ वर्षस्य मानदण्डानुसारं तस्य मासिकी आयः ८,००० रूप्यकाणि निर्धारिता। दुर्घटनायाः समये मोहितस्य वयः २३ वर्षाणि आसीत्। अधिकरणेन प्रमादात् तस्य वयः ३३ वर्षाणि मत्वा ११ परिमितः गुणकः प्रयुक्तः आसीत्। उच्चन्यायालयः वयसानुसारं समीचीनम् गुणकम् '१८' प्रयुक्तवान्। उच्चतमन्यायालयस्य सिद्धान्तानाम् अन्तर्गतं मृतस्य स्वरोजगारत्वात् ४० वर्षाणां न्यूनवयस्कत्वात् च तस्य स्थापितायाम् आयां ४०% अतिरिक्ता राशिः योजिता। यतो हि युवकः अविवाहितः आसीत्, अतः नियमानुसारं कुलराशौ ५०% राशिः तस्य वैयक्तिकजीवनशैलीव्ययरूपेण कर्तिता (कटौती की गई)। न्यायालयेन 'इफको टोक्यो जनरल इंश्योरेंस' इति बीमा-समवायः (कंपनी) संशोधित-कुल-क्षतिपूर्तिं १३,०२,७७० रूप्यकाणि अधिकरणेन पूर्वं निर्धारितेन ७.५% वार्षिक-व्याजदरेण सह पीड़ितां मातरं दातुं निर्दिष्टः।

# संस्कृतविश्वविद्यालयस्य द्वौ छात्रौ सन्दिग्धपरिस्थितिषु अदृश्यौ, ब्यासनद्याः तीरे प्राप्तौ स्यूतौ

हिमसंस्कृतवार्ताः - काङ्गड़ा।केंद्रीय-संस्कृत-विश्वविद्यालयस्य वेदव्यास-परिसरे बलाहर-स्थले अध्ययनरतौ शास्त्री-प्रथमवर्षस्य द्वौ अप्राप्तवयस्कौ (नाबालिग) छात्रौ सन्दिग्धपरिस्थितिषु अदृश्यौ जातौ। सोमवासरे प्रातः गृहात् विश्वविद्यालयं गन्तुं निर्गतौ उभौ छात्रौ दचिरसायङ्कालपर्यन्तं न प्रत्यागतवन्तौ, यदनन्तरं परिजनैः कृतायाः याचनायाः (शिकायत) आधारेण देहरा-आरक्षकस्थानकेन (थाना) प्रथमसूचनापत्रं (एफआइआर) पञ्जीकृत्य व्यापकं अन्वेषण-अभियानम् आरब्धम्। छात्रयोः अदृश्यतायाः हरिपुर-तहसीलस्य बगरोट-निवासिना रमणकुमारेण आरक्षकस्थानके देहरा-मध्ये उपालम्भः कृतः। अस्मिन् तेन उक्तं यत् तस्य १७ वर्षीयः पुत्रः कृषशर्मा तथा १७ वर्षीयः भ्रातृव्यः (भतीजा) सक्षिवशर्मा सोमवासरे प्रातः अष्टवादने विश्वविद्यालयस्य कृते निर्गतवन्तौ आसन्। तदनन्तरं सायङ्कालपर्यन्तं गृहं न प्रत्यागतौ। परिजनैः चलभाषेण (मोबाइल) सम्पर्कस्य प्रयासे निष्फले जाते उभयोः दूरभाषयोः पिहितत्वे (स्विच ऑफ) च सति आरक्षकाय सूचना दत्ता। अस्मात् परं आरक्षकैः परिजनैः सह विश्वविद्यालयपरिसरे, पार्श्ववर्तिषु क्षेत्रेषु, सम्भाव्यमार्गेषु च गहनम् अन्वेषण-अभियानम् आरब्धम्। अस्मिन् अन्तरे 'लोअर सुनहेत' क्षेत्रे ब्यासनद्याः तीरे उभयोः छात्रयोः स्यूतौ प्राप्तौ।

# सरदार- पटेल- विश्वविद्यालय- मण्डीनगरस्य इतिहास- विभागस्य छात्राः सेट-२०२६-परीक्षायां प्राप्तवन्तः उल्लेखनीयं साफल्यम्







**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा**

सरदार- पटेल- विश्वविद्यालय- मण्डीनगरस्य इतिहासविभागस्य छात्राः राज्य-पात्रता-परीक्षायां (सेट-२०२६) उत्कृष्टं प्रदर्शनं कुर्वन्तः विभागस्य विश्वविद्यालयस्य च नाम गौरवान्वितं कृतवन्तः। इतिहास-विभागस्य आहत्य पञ्च छात्राः एतां प्रतिष्ठितां परीक्षां सफ़लतापूर्वकम् उत्तीर्णाः अभवन्। एम.ए. इतिहास-सत्रात् २०२४-२०२६ गौरव रावतः, दीपक दीपांशुः, विक्रान्तः, कृष्णादेवी च, यदा च एम.ए. इतिहास-सत्रात् २०२३-२०२५ सपनाकुमारी सेटपरीक्षाम् उत्तीर्य स्व-शैक्षणिक-प्रतिभायाः उत्कृष्टं परिचयम् अयच्छत्। अस्मिन् अवसरे सरदार- पटेल- विश्वविद्यालय- मण्डीनगरस्य कुलपतिः आचार्यः प्रो. ललितकुमार अवस्थी सफलछात्रान् वर्धापयन् अवदत् यत् सेट- परीक्षायाम् इतिहास-विभागस्य छात्राणां सफ़लता विश्वविद्यालयस्य गुणवत्तापूर्णशिक्षायाः, समर्पित- शिक्षकाणां मार्गदर्शनस्य, छात्राणां निष्ठायाः च परिश्रमस्य च उत्कृष्टम् उदाहरणम् अस्ति। एषा उपलब्धिः अन्यछात्राणां कृते अपि प्रेरणास्रोतः भविष्यति। सः अकथयत् यत् विश्वविद्यालयः छात्रेभ्यः गुणवत्तापूर्णशिक्षाम्, अनुसन्धानं, प्रतियोगी- परीक्षाणां सज्जतायै अनुकूलं शैक्षणिक- वातावरणम् उपलब्धं कारयितुं निरन्तरं प्रतिबद्धः अस्ति। कुलपतिः सर्वान् सफ़ल-छात्रान्, तेषाम् अभिभावकान् तथा च इतिहास-विभागं शुभकामनाः ददन् तेषाम् उज्ज्वल-भविष्यार्थं कामनाम् अकरोत्। अस्याम् उपलब्धौ इतिहासविभागाध्यक्षः डॉ. राकेशकुमार शर्मा सर्वान् सफलछात्रान् हार्दिकीं वर्धापनां शुभकामनाश्च यच्छन् अवदत् यत् एषा सफ़लता छात्राणां कठोरपरिश्रमस्य, अनुशासनस्य, निरन्तर- अध्ययनस्य, विभागे उपलब्धस्य उत्कृष्ट- शैक्षणिक- वातावरणस्य च प्रतिफलम् अस्ति। सः अकथयत् यत् इतिहासविभागः छात्रान् प्रतियोगी- परीक्षाभ्यः, शोधकार्याय अकादमिक-उत्कृष्टतायै च निरन्तरं प्रेरितं मार्गदर्शितं च करिष्यति। सः विश्वासं प्रकटितवान् यत् एते छात्राः भविष्ये उच्चशिक्षायाः, शोधस्य अध्यापनस्य च क्षेत्रे उल्लेखनीयं योगदानं दत्त्वा विश्वविद्यालयस्य नाम राष्ट्रियस्तरे अधिकं प्रतिष्ठितं करिष्यन्ति। अस्याम् उपलब्धौ छात्रकल्याण-अधिष्ठाता प्रो. राजेशकुमार शर्मा, छात्र-कल्याण-अधिष्ठाता डॉ. पवन-चन्दः, शोध-अधिष्ठाता डॉ. सनीलठाकुरः, इतिहास-विभागस्य सहायकाचार्यः डॉ. रामपालः, विकेश कुमारः, राजेशकुमारः च छात्रान् वर्धापितवन्तः।

# श्रीविश्वनाथ- संस्कृत- महाविद्यालये, चकमोहे दशदिवसीयस्य संस्कृत- सम्भाषण- शिविरस्य समापनम्



**हिमसंस्कृतवार्ताः- सरोज शर्मा।** श्रीविश्वनाथ-संस्कृतमहाविद्यालये, चकमोहे (हमीरपुरजनपदे, हिमाचलप्रदेशे) संस्कृतभारती हिमाचलप्रदेशस्य तत्त्वावधानेन आयोजितस्य दशदिवसीयस्य संस्कृतसम्भाषणशिविरस्य अद्य सफलतापूर्वकं समापनम् अभवत्। शिविरस्य अवसरे छात्राः महतउत्साहेन संस्कृतभाषां पठितवन्तः। संस्कृतभाषायाः व्यावहारिकरूपेण भाषणम्, अवगमनं शिक्षितवन्तः। समापनसमारोहे छात्राः संस्कृतेन परस्परं सम्वादं, वस्तुनामानि, अभिनयगीतम्, संस्कृतगीतं, विविधाः रोचकाः गतिविधयः प्रभावशालिरूपेण प्रदर्शितवन्तः। छात्राः स्वानुभवान् संविभज्य उक्तवन्तः यत् अनेन शिविरेण तेषाम् अन्तः संस्कृतभाषणाय आत्मविश्वासः वर्धितः, भाषां प्रति च तेषाम् अनुरागः अधिकः दृढः जातः। अस्मिन् अवसरे महाविद्यालयस्य सर्वे अध्यापकाः उपस्थिताः आसन्। आचार्यः राकेशशर्मामहोदयः स्वकीये सम्बोधने अवदत् यत् संस्कृतभारती सम्पूर्णे देशे संस्कृतस्य प्रचार-प्रसाराय निरन्तरं कार्यं करोति, एतादृशाः सम्भाषणशिविराः च संस्कृतं जन-जनं प्रति प्रापयितुं महतीं भूमिकां निर्वहन्ति। ते विस्तरिका सरोज महोदयां प्रति अग्रहं कृतवन्तः यत् भविष्ये अपि श्रीविश्वनाथ- संस्कृत- महाविद्यालये, चकमोहे एतादृशाः संस्कृत सम्भाषण शिविराः आयोज्येरन्, येन अधिकाधिकाः छात्राः लाभान्विताः भवेयुः। कार्यक्रमस्य अन्ते आचार्य राकेशशर्मा महोदयेन सह महाविद्यालयस्य सर्वैः अध्यापकैः विस्तरिकायाः सरोज महोदयायाः समर्पणाय, परिश्रमाय, उत्कृष्ट मार्गदर्शनाय च तस्याः हृदयेन कृतज्ञता, धन्यवादश्च प्रकटितः। सर्वे आशां व्यक्तवन्तः यत् भविष्ये अपि एतादृशाः आयोजनाः संस्कृतभाषायाः संवर्धने छात्राणां च सर्वांगीण विकासे महत्त्वपूर्णं योगदानं दास्यन्ति।

# सिरमौरजनपदस्य एकस्यैव परिवारस्य त्रयः बालकाः राज्यपात्रतापरीक्षायां (SET) सफलाः; क्षेत्रे हर्षोल्लासः





हिमसंस्कृतवार्ता सिरमौरः। राज्य-लोकसेवा-आयोगेन घोषिते राज्यपात्रतापरीक्षायाः (SET) परिणामे हिमाचल प्रदेशस्य सिरमौर-जनपदस्य एकस्यैव परिवारस्य त्रिभिः बालकैः महती सफलता सम्प्राप्ता। अनेन न केवलं तस्मिन् परिवारे अपि तु सम्पूर्णे पच्छाद-क्षेत्रे हर्षस्य उल्लासस्य च लहरी विद्यते। प्राप्तविवरणानुसारं सिरमौर-जनपदस्य पच्छादक्षेत्रस्य चन्हालग-ग्रामनिवासी शिवांशः मनोविज्ञानविषये राज्यपात्रता-परीक्षाम् उत्तीर्णवान्। तथैव पच्छादक्षेत्रस्य लांना-मियूँ-ग्रामस्य निवासिन्यौ ज्योत्स्ना तथा महकः संस्कृतविषये 'सेट्' (SET) परीक्षायां सफलतां प्राप्तवत्यौ। एतस्याः महत्याः सफलतायाः श्रेयः एभिः बालकैः स्व-पितामह-पितामहीभ्याम्, माता-पितृभ्याम्, तथा च सम्पूर्णेभ्यः परिवारजनेभ्यः समर्पितम्। तेषामनुसारम् ज्येष्ठानां शुभाशीर्वादैः, निरन्तर-मार्गदर्शनेन च एषा महती उपलब्धिः प्राप्ता।

# 'एकं भारतम्, श्रेष्ठं भारतम्' बहुभाषिककथा-पाठकार्यक्रमे भारतीयभाषाणां वैविध्यस्य मनोहरं प्रदर्शनम्



नवदेहली (सरगङ्गारामचिकित्सालयमार्गः)। सरगङ्गारामचिकित्सालयमार्गस्थे बालभारती पब्लिक स्कूल् इत्याख्ये प्रशासनेतर-विद्यालये 'एकं भारतम्, श्रेष्ठं भारतम्' इत्यस्य अभियानस्य अन्तर्गतं बहुभाषिककथापाठकार्यक्रमस्य भव्यम् आयोजनम् अभवत्। अस्मिन् कार्यक्रमे पञ्चाशदधिकाः छात्राः विविधभारतीयभाषासु कथानां प्रभावपूर्णं वाचनं कृत्वा भारतीयसंस्कृतेः भाषिकवैविध्यस्य च सजीवं परिचयं प्रदर्शितवन्तः।कार्यक्रमस्य शुभारम्भः मङ्गलाचरणेन, दीपप्रज्वलनेन, स्वागतगीतेन तथा उपप्रधानाचार्यायाः श्रीमती विनीता धवन-महोदयायाः स्वागतभाषणेन अभवत्। तया स्वसम्बोधने उक्तम्— "प्रत्येकभारतीयेन स्वभाषायां, संस्कृतौ, वेशभूषायां च गौरवं कर्तव्यम्। एषा अस्माकं पूर्वजैः अस्मभ्यं समर्पिता अमूल्यं सांस्कृतिकं रिक्थम् अस्ति। अस्य रिक्थस्य संरक्षणं संवर्धनं च अस्माकं सर्वेषां दायित्वम् अस्ति। स्वमूलैः सह सम्बद्धाः एव वयं सुदृढस्य राष्ट्रस्य निर्माणे महत्त्वपूर्णं योगदानं दातुं शक्नुमः।"कार्यक्रमस्य विशिष्टातिथिः संसद्-टीवी इति समवायस्य वरिष्ठनिर्माता श्री प्रदीप कुमार-महोदयः छात्राणां प्रस्तुतीनां प्रशंसां कृत्वा अवदत् यत् भारतीयभाषाणां वैविध्यमेव भारतस्य महद् बलम् अस्ति। बहुभाषिककथापाठसन्निभाः कार्यक्रमाः छात्रेषु अभिव्यक्तिकौशलं, आत्मविश्वासं, लोकतान्त्रिकमूल्यानि राष्ट्रियैक्यभावनां च सुदृढीकुर्वन्ति।अयं कार्यक्रमः प्रधानाचार्यस्य श्री दीपक दुआ-महोदयस्य प्रेरणया उपप्रधानाचार्यायाः श्रीमती विनीता धवन-महोदयायाः च मार्गदर्शनेन सफलतया सम्पन्नः। कार्यक्रमस्य सफलसंयोजनं वरिष्ठसंस्कृत-हिन्दीशिक्षकेन डॉ. युवराजभट्टराई-महोदयेन कृतम्। अस्य आयोजनस्य सफलतायां श्री उमेश भारद्वाज-महोदयस्य तथा श्रीयुतायाः अञ्जलि-वशिष्ठ-महोदयायाः विशेषः सहयोगः आसीत्।कार्यक्रमस्य प्रभावपूर्णं सञ्चालनं दशमकक्षायाः प्रतिभाशालिनीभ्यां छात्राभ्यां भृतिसहगलः कीर्ति बाली चेत्येताभ्यां अत्यन्तमेव आत्मविश्वासेन गरिम्णा च विहितम्। तयोः सहजं प्रभावशालि च मञ्चसञ्चालनं सम्पूर्णमपि कार्यक्रमं अधिकम् आकर्षकम् अकरोत्।कार्यक्रमे छात्रैः हिन्दी, संस्कृत, तमिळ, तेलुगु, मलयालम्, कन्नड, उड़िया, बाङ्ग्ला, असमिया, नेपाली, मराठी, गुजराती, पञ्जाबी, कश्मीरी, सिन्धी चेत्यादिषु भारतीयभाषासु कथानां भावपूर्णं प्रस्तुतीकरणं कृतम्, येन उपस्थिताः अतिथयः दर्शकाश्च मन्त्रमुग्धतां गताः । संस्कृतस्वागतगीतस्य उड़ियाभाषायां लोककथायाः च उत्कृष्टप्रस्तुत्यर्थं दिव्यांशी छुआलसिंह इत्याख्या छात्रा 'सर्वश्रेष्ठकथाप्रस्तोता' इति सम्मानेन सम्मानिता।

# सीबीएसई-पूरकपरीक्षा : बोकारो-नगरस्य द्वयोः परीक्षाकेन्द्रयोः १३०६ परीक्षार्थिनः द्वादशकक्षायाः पूरकपरीक्षाम् अलिखन्



**हिमसंस्कृतवार्ताः- सौरभ दे, बोकारो।** केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन (सीबीएसई) आयोजिता द्वादशकक्षायाः पूरकपरीक्षा मङ्गलवासरे सम्पूर्णे देशे सम्पन्ना। अस्याः एकदिवसीयायाः परीक्षायाः कृते बोकारो मंडले द्वौ परीक्षाकेन्द्रौ निर्धारितौ एकः सेक्टर– ४ स्थितः दिल्ली- पब्लिक- विद्यालयः (डीपीएस) बोकारो, अपरः सेक्टर– ५ स्थितः चिन्मय-विद्यालयः, बोकारो। एतयोः केन्द्रयोः समष्ट्या १३०६ परीक्षार्थिनः परीक्षाम् अलिखन्।

सीबीएसई- नगरसमन्वयकः तथा डीपीएस- बोकारो- विद्यालयस्य प्राचार्यः डा.ए. एस. गङ्गवारः अवदत् यत् सम्पूर्णा परीक्षा शान्तिपूर्णतया कदाचाररहिततया च सम्पन्ना। प्रशासनस्य सहयोगेन, केन्द्राध्यक्षानां, पर्यवेक्षकाणां, सर्वेषां वीक्षकाणां च संयुक्तप्रयत्नैः उभयोः केन्द्रयोः परीक्षा निर्विघ्नतया सम्पन्ना। कुतश्चिदपि प्रकारस्य अव्यवस्थायाः सूचना न प्राप्ता। परीक्षायाः सफलसञ्चालने योगदानं कृतवतां सर्वेषां प्रति तेन हार्दिकः कृतज्ञताभावः व्यक्तः।

डा.गङ्गवारः अवदत् यत् डीपीएस-बोकारो-केन्द्रे पञ्जीकृतानां ८४३ परीक्षार्थिनां मध्ये ८०४ परीक्षाम् अलिखन्, ३९ अनुपस्थिताः अभवन्। तथैव चिन्मय- विद्यालय- केन्द्रे पञ्जीकृतानां ५३५ परीक्षार्थिनां मध्ये ५०२ उपस्थिताः अभवन्, ३३ च अनुपस्थिताः आसन्।

उल्लेखनीयम् अस्ति यत् सीबीएसई-मण्डलेन पूरकपरीक्षायाः माध्यमेन तेषां छात्राणां पुनरपि उत्तीर्णतायाः अवसरः प्रदत्तः ये सम्पूरक-श्रेण्यां सन्ति तथा स्वेषु अवशिष्टविषयेषु उत्तीर्णाः भवितुम् इच्छन्ति। अपि च ये छात्राः कस्यचित् एकस्य विषयस्य परिणामम् उन्नेतुम् इच्छन्ति, तेभ्यः अपि अयं विशेषावसरः आसीत्। परीक्षा प्रातः १०:३० वादनात् मध्याह्नस्य १:३० वादनपर्यन्तं आयोजिता। अस्यां परीक्षायां अङ्ग्लभाषा, हिन्दी, गणितम्, भौतिकविज्ञानम्, रसायनविज्ञानम्, जीवविज्ञानम्, लेखाशास्त्रम्, वाणिज्य-अध्ययनम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, भूगोलः, इतिहासः, सङ्गणकविज्ञानम्, मनोविज्ञानम्, समाजशास्त्रम्, सूचना-अभ्यासः, उद्यमिता, गृहविज्ञानम्, अनुप्रयुक्तगणितम् इत्यादयः प्रमुखाः शैक्षिकविषयाः, विविधाः व्यावसायिकविषयाः अपि समाविष्टाः आसन्।


# वाद-विवाद-प्रतियोगितायाम् उत्पल-झा-आदित्य-कुमारौ प्रथमस्थानं प्राप्तवन्तौ



हिमसंस्कृतवार्ता- विश्व मोहन झा , दरभंगा। ललितनारायणमिथिला-विश्वविद्यालयस्य स्नातकोत्तर-वाणिज्य-विभागे बिहार-प्रादेशिक-मारवाड़ी-सम्मेलनस्य दरभंगा-शाखायाः तत्वावधानैः एका बृहत्-वाद-विवाद-प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां पक्षे विश्वविद्यालयस्य संगीत-नाट्य-विभागस्य उत्पल झाः प्रथमं, राजनीति-विभागस्य अनीश कुमारः द्वितीयं, सी.एम.-महाविद्यालयस्य जोया परवीनः तृतीयं तथा मारवाड़ी-समाजस्य वेद मित्तलः चतुर्थस्थानं प्राप्तवन्तः। तथैव विपक्षे विश्वविद्यालयस्य अर्थशास्त्र-विभागस्य आदित्य कुमारः प्रथमं, मारवाड़ी-समाजस्य श्रेया वर्मा द्वितीयं तथा छवि चौधरी तृतीयं एवं जन्तुविज्ञान-विभागस्य प्रिया कुमारी चतुर्थस्थानं प्राप्तवन्तः। सर्वान् विजयेतृ-प्रतिभागिनः आयोजकानां पक्षतः स्थान-प्रमाणपत्रैः, पदकैः अनेकैः उपहारैः च सम्मानिताः अभवन्।

## षष्टिः तः अधिकाः छात्राः गृहीतवन्तः भागम्

अस्यां प्रतियोगितायां सी.एम.-महाविद्यालयस्य, सी.एम.-साइंस-महाविद्यालयस्य, एम.आर.एम.-महाविद्यालयस्य, तथा एम.एल.एस.एम.-महाविद्यालयस्य स्नातकोत्तरस्य द्वौ-द्वौ छात्रौ क्रमशः पक्षे विपक्षे च भागम् अगृह्णन्।



# "गुरुपौर्णिमा विशेषः" गुरुः

गुरुशब्दस्य आचार्यः, उपाध्यायः, अग्रजः, श्रेष्ठः, उपदेशकः इत्यादयः अनेकाः अर्थाः सन्ति।

## गुरुशब्दस्य काश्चन व्याख्याः-

**{१} गिरत्यज्ञानमिति-** अज्ञानं हरति।
**{२}गृणाति धर्ममिति-** यः धर्मोपदेशं करोति।
**{३} गिर्यते इति-** यस्य स्तुतिः गीयते।

## मनुः गुरुलक्षणं यथा वर्णितम्-

**"निषेकादिनि कर्माणि यः करोति यथाविधि।**
**सम्भावयति चान्नेन स विप्रो गुरुरुच्यते।"**

**याज्ञवल्क्यः अपि एतां मनुव्याख्यां अनुमोदितवान्।**

**देवलस्मृतौ एकादश गुरुनां उल्लेख कृतः अस्ति।**

**"आचार्यश्च पिता ज्येष्ठो भ्राता चैव महिपतिः।**
**मातुलः श्वशुरस्त्राता मातामहपितामहौ।**
**वर्णज्येष्ठः पितृव्यश्च पुंस्यते गुरवो मताः।।"**

**नामचिन्तामणिग्रन्थे द्वादश प्रकाराः गुरुणां वर्णनं कृतम् अस्ति।**

**{१} धातुवादी गुरुः-** शिष्यं तीर्थयात्रां कृत्वा नानाविधाध्यात्मिकं साधनां कृत्वा अन्ते ज्ञानोपदेशं ददाति।
**{२} चन्दनगुरुः-** यथा चन्दनवृक्षः समीपस्थवृक्षान् सुगन्धान् करोति, तथैव तस्य उपस्थित्या एव शिष्यस्य जीवनसागरं लङ्घयितुं साहाय्यं करोति।
**{३} विचार गुरुः-** शिष्याय सम्पूर्ण प्रज्ञां उपदिश्य पिपीलिकामार्गेण आत्मसाक्षात्कारं सम्पादयति।
**{४} अनुग्रहगुरुः-** कृपानुग्रहेण एव शिष्याय ज्ञानं प्रयच्छति।
**{५} परीसगुरुः-** यथा स्पर्शमणिमात्रेण लोहं सुवर्णं परिणमयति तथा हस्तस्पर्शमात्रेण साधकाय दिव्यं ज्ञानं ददाति।
**{६} कच्छपगुरुः-** यथा कच्छपी केवलं दृष्ट्या एव स्वसन्ततिं पोषयति, तथैव स स्वशिष्यं प्रसादलोकात् तारयति।
**{७} चन्द्रगुरुः-** यथा चन्द्रोदयानन्तरं चन्द्रमणिः द्रवति, तथैव हृदयकरुणामात्रेण शिष्यः पारितः भवति।
**{८} दर्पणगुरुः-** यथा दर्पणे स्वमुखं एव दृश्यते, आत्मसाक्षात्कारेणैव च शिष्यं ब्रह्मज्ञानं प्रयच्छति।
**{९} छायानिधिगुरुः-** साधकस्य उपरि स्वछायां धृत्वा तं स्वानन्दसाम्राज्यस्य शासकं करोति।
**{१०} नादनिधिगुरुः-** नादनिधिः नाम रत्नम्, अस्य सम्पर्कं प्राप्य यः कोऽपि धातु सुवर्णरूपेण परिणमति, तथैव साधकस्य करूणावचनं श्रुत्वा शिष्याय दिव्यज्ञानं ददाति।
**{११} क्रौंचगुरुः-** स्वस्थाने शिष्यस्य स्मरणं कृत्वा शिष्यं आत्मानन्द यः ददाति स क्रौंचगुरुः।
**{१२} सूर्यकान्तगुरुः-** सूर्यकान्तमणिः सूर्यकिरणस्पर्शात् अग्निः जायते। यत्र-यत्र गुरोः दृष्टिः भ्रमति तत्र सर्वेभ्यः शिष्येभ्यः विदेहत्वं ददाति।

## पिश्चलातन्त्रे दीक्षागुरुः शिक्षागुरुः च द्विविधौ वर्णितौ स्तः

**{१} दीक्षागुरुः-** दीक्षागुरुः पूर्वपरम्पराया प्राप्तेषु मन्त्रेषु दीक्षां ददाति।
**{२} शिक्षागुरुः-** ध्यान, योग आदि विभिन्न विधियां यः अध्यापयति स शिक्षागुरुः।

## कुलागमे षट्प्रकाराः गुरवः वर्णिताः सन्ति

**"प्रेरकः सूचकश्चैव वाचको दर्शकस्तथा।**
**शिक्षको बोधकश्चैव षडेते गुरवः स्मृताः।"**

एतेषु सर्वेषु गुरुषु बोधकः गुरुः श्रेष्ठः अस्ति। समर्थ रामदासस्वामी अपि सप्तदश प्रकारगुरुणां वर्णनं कृतवान् अस्ति। ब्रह्मज्ञानं प्रददाति गुरुः श्रेष्ठः सद्गुरुः कथ्यते। आगमसारे गुरुशब्दस्य त्रयाणां अक्षराणाम् अर्थः एवं प्रकारेण व्याख्यातः।

**"गकारः सिद्धिदः प्रोक्तो रेफः पापस्य हारकः।**
**उकारो विष्णुव्यक्तस्त्रितयात्मा गुरुः परः।।"**

गुरुविषये लेखः अपि गुरुः भविष्यति न वा? भवतः किं मतम्? अन्ते- "सागरः तथा गुरुः द्वयोऽपि गभीरम्। किन्तु भेदोऽपि अस्ति, सागरस्य गभीरे मनुष्याः निमज्जन्ति, किन्तु गुरौ गभीरता, अस्मान् तारयन्ति।।"

**डा.वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम् ©®**



हिमसंस्कृतवार्ता

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संकृतं मधुरं सदा - ६२

संस्कृतम् अनिवार्यमस्ति भारते। यदि एतस्य कथञ्चित् लोपो भवेत् तर्हि भारतीयं धर्मसंकृतिसंस्कारादिकं सर्वं नश्येत्। इतरसमुदायस्य बलं वर्धेत तदा। अस्माकं परिचय एव नश्येत्। भारतीया परम्परा संस्कृतसंस्कृत्योः कारणतो अद्यप्रभृति जीविता अस्ति। कथितमस्ति यत्- "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा" इति। यदि एतयोः नाशः सम्भवेत् तर्हि अस्माकम् अस्तित्वं हि इतो विनश्येत्। तस्माद् अद्यतनानाम् अस्माकं प्रत्येकं गुरुत्वपूर्णं दायित्वं यत् स्वप्राणान् अर्पयित्वा अपि संस्कृतस्य संरक्षणं कर्तव्यमिति। एतत् कथं संरक्षणं प्राप्नुयात् इत्युक्ते अस्माभिः सर्वैरपि संस्कृतस्य पठनं, पाठनं, लेखनं, सभादिषु सम्भाषणं, परस्परं कथोपकथनं, प्रसारणम् इत्यादिवाग्व्यवहारस्य सततम् अभ्यासः करणीयो भवति। विना प्रयासं न किमपि सिद्ध्यतीति तु सत्यवचनम्। एवञ्चेत् संस्कृतं शनैः उज्जीवनं प्राप्नुयात्, समाजे अस्य प्रभावो वर्धमानो भवेत्। परस्परं वार्तालापेन समाजे एकं सुन्दरं वातावरणं सम्भवेत्। बालाः अपि तच्छ्रुत्वा संस्कृतं प्रति आकृष्टाः भवेयुः, वदितुं च अभ्यासं कुर्युः । भाविकालेऽपि तेषां कारणतः संस्कृतस्य वातावरणं सम्भवेत्। अस्मिन् विषये विशेषतः संस्कृतविषयस्य अध्येतॄणां, संस्कृतज्ञानां वा परमं दायित्वमस्ति यत् ते हि प्रथमतो जनसमाजे संस्कृतविकासाय अग्रेसरा भवेयुः, इतरेभ्यः सामान्येभ्यः संस्कृतविषये मार्गदर्शनं, प्रेरणाम्, उत्साहं, मनोबलं च दद्युः। एवञ्चेद् संस्कृतविकासो लोके सम्भवेत्। एतत्तु सत्यमेव यत् सामान्यजनाः अपि प्रायशः स्वाभाविकतया संस्कृतमिच्छेयुः। तस्मात् संस्कृतज्ञैः तेषां कृते मार्गदर्शनाय, प्रेरणायै वा सुव्यवस्था परिकल्पनीया।

परन्तु यदि संस्कृतज्ञाः समाधानस्थाने केवलं व्यवधानं हि उत्पादयेयुः तर्हि संस्कृतविकासस्य स्वप्नः फलीभूतो भवितुं नार्हेत्, तत्पूर्णतां वा न गच्छेत्। एवं ते परस्परं पङ्कप्रक्षेपणे हि व्यस्ताः भवेयुः तर्हि तादृशेन कार्येण भाषाप्रभावः, सौन्दर्यञ्च नश्येत्, गणेष्वपि कदाचिदेवं दृश्यते, यच्च तस्य प्रमाणम्। मन्यताम्, यदि संस्कृतविषयकाः अल्पविद्यावन्तः, आत्ममानिनः, समादरकामिनः, तथाकथितसंस्कृतज्ञाः एव अधिकसङ्ख्यकाः जनसमाजे स्युः, तर्हि स्वप्नोऽयं न कदापि साकारतां गच्छेत्, संकृतमपि अचिरेण, यथाकालं वा इतो विलयतां गच्छेत्, नात्र सन्देहस्थानम्। अतः अस्मिन् विषये अस्माभिः सम्यगविचारणीयम्। संस्कृतमेव अस्माकं नैजमातृभाषा, नात्र शङ्का। अस्मत्पितृभिः महर्षिभिः प्रदत्ता भाषेयम्। तस्मात् संस्कृतस्य संरक्षणम् अस्माकं प्रथमं महच्च दायित्वमस्ति इति, शम्।




## घर-घर चर्चा होई बिटियां गुलघुटुएं बी रोई बिटियां

पुत्तर कूळे-कूळे बूटे
अप्पू पळी सरोह्ई बिटियां

अंग्गण लीपण सोत बुहारां
चुल्हे रोज चंडोई बिटियां

मारू रक्खे हिक्कां लाई
पिट्ठी पळीं खड़ोई बिटियां

शरमा हेठ दबोई बिटियां
दूरा ते पणछोई बिटियां

मां बब्बा दी हिक्क जकोई
जे थोड़ा तलकोई बिटियां

इक पुतरे दी आसा थल्ले
ढिड्डे च दरड़ोई बिटियां

दुनिया गर्म मिजाजां वाळी
पक्खे ख़ूब टंगोई बिटियां

डिंड सिखाए घोटी-घोटी
अप्पू ते समझोई बिटियां

रोज बंडोए भाऊ-भाऊ
पर न कदी बंडोई बिटियां



संजय मेहरा
गांव - लाहड़
पोस्ट - अप्पर लम्बागांव
तहसील जयसिंहपुर
जिला कांगड़ा (हि प्र)
पिन 176096
मो० 9418085560



हिमसंस्कृतवार्ताः, ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य बहु-विचित्राः वार्ताः श्रुताः सन्ति। अमेरिका-देशस्य 'येलोस्टोन' नामके राष्ट्रीये उद्याने एकेन क्रुद्धेन वन्यमहिषेण एकं बृहद्यानं घट्टितम्। शृङ्गेण यानस्य चक्रं स्फोटितम् अस्ति।

**नन्दिनी-** अहो भयङ्करः सः महिषः! वन्यजीवानां कोपः खलु भयङ्करः। अन्या वार्ता श्रुता किम्? बेङ्गलूरुनगरे एकेन ऋणरहितेन तन्त्रज्ञेन सामाजिकमाध्यमे स्वस्य दुःखं प्रकाशितम्। तेन प्रतिमासं रूप्यकलक्षद्वयम् अर्जितम् अस्ति। तेन दारिद्र्यम् अनुभूतम्।

**काव्या-** कियत् आश्चर्यम्! एतावान् धनसञ्चयः कृतः अस्ति, तथापि असन्तोषः! सम्प्रति कार्यालयेषु अपि विचित्राः घटनाः दृष्टाः सन्ति। एकेन मुख्य-अधिकारिणा एकस्मै युवकर्मकराय सन्देशः प्रेषितः। कर्मकरः कार्य-समयात् दशनिमेषैः पूर्वम् एव कार्यालयतः निर्गतः, अतः सः तर्जितः।

**नन्दिनी**- अहो! केवलं दश-निमेष-कारणात् एवं कृतम्! कार्यसंस्कृतिः अतीव कठोरा सञ्जाता अस्ति। इदानीम् एका पाकशाला-वार्ता मया उच्यते। एकया महिलया बहिः पात्राणि प्रक्षालितानि। जलनालिकां धर्तुं यन्त्रं नाभूत्, अतः तया स्वस्याः केशबन्धनी प्रयुक्ता। केशबन्धनी-माध्यमेन जलनालिका केशेषु बद्धा। जनाः एतत् तन्त्रं दृष्टवन्तः सन्ति।



डॉ. सन्तोषकुमारकाण्डपालः
सहायकाचार्यः (शिक्षाशास्त्र-विभागः)
महर्षिपाणिनि- संस्कृत- वैदिक-विश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः

# तस्मै श्री गुरवे नमः

सदाशिवसमारम्भां, शंकराचार्य मध्यमाम्।
अस्मदाचार्यपर्यन्तां, वन्दे गुरु परम्पराम्॥

ध्यानमूलं गुरोर्मूर्तिः, पूजामूलं गुरोर्पदम्।
मन्त्रमूलं गुरोर्वाक्यं, मोक्षमूलं गुरोः कृपाः॥

गुरुर्ब्रह्मा गुरुर्विष्णुः, गुरुर्देवो महेश्वरः।
गुरुर्साक्षात् परब्रह्म, तस्मै श्री गुरवे नमः॥

अखण्डमण्डलाकारं, व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन, तस्मै श्री गुरवे नमः॥

अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया।।
चक्षुरुन्मीलितं येन, तस्मै श्री गुरवे नमः॥

सर्वश्रुति शिरोरत्न, समुद्भाषित मूर्त्तये।
वेदान्ताम्बुज सूर्याय, तस्मै श्री गुरवे नमः॥

स्थावरं जङ्गमं व्याप्तं, येन कृत्स्नं चराचरम्।
तत्पदं दर्शितं येन, तस्मै श्री गुरवे नमः॥

चिद्रूपेण परिव्याप्तं, त्रैलोक्यं सचराचरम्।
तत्पदं दर्शितं येन, तस्मै श्री गुरवे नमः॥

चैतन्यः शाश्वतश्शान्तो,व्योमातीतो निरञ्जनः।
विन्दुनादकलातीतः, तस्मै श्री गुरवे नमः॥

ज्ञानशक्तिसमारूढः, तत्त्वमालाविभूषितः।
भुक्तिमुक्तिप्रदाता च, तस्मै श्री गुरवे नमः॥

अनेकजन्म सम्प्राप्त, कर्म-बन्ध-विदाहिने।
आत्मज्ञानाग्निदानेन, तस्मै श्री गुरवे नमः॥

शोषणं भवसिन्धोश्च, प्रापणं सारसम्पदः।
यस्य पादोदकं सम्यक्, तस्मै श्री गुरवे नमः॥

न गुरोरधिकं तत्त्वं, न गुरोरधिकं तपः।
तत्त्वज्ञानात्परं नास्ति, तस्मै श्री गुरवे नमः॥

मन्नाथः श्री जगन्नाथो, मद्गुरुः श्री जगद्गुरुः।
मदात्मा सर्वभूतात्मा, तस्मै श्री गुरवे नमः॥

गुरुरादिरनादिश्च, गुरुः परं दैवतम्।
गुरोः परतरं नास्ति, तस्मै श्री गुरवे नमः॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं,
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं,
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥

## लौकिकन्यायकोशः

# ऊषरबीजन्यायः

ऊषर इति निःसारं क्षेत्रम्। तस्मिन् क्षेत्रे बीजानि उप्तानि उत्तमा वशष्टिः च जाता चेदपि तानि न रोहन्ति। बीजानां प्ररोहणे सारभूमेः आवश्यकता भवति। तथैव संस्कारहीने पुरुषे उत्तमाः परिणामाः न संभवन्ति।

डा.वर्षा प्रकाश टोणगांवकर
पुणे, महाराष्ट्रम्

गुरु पूर्णिमा विशेषः



गुरुपूर्णिमायाः पावनपर्वणि मम परमपूज्यगुरवे,अनन्तश्रीवासुदेवसंस्कृत-महाविद्यालयस्य आदरणीयाय श्रीराम-शरणद्विवेदीमहोदयाय सादरं प्रणमामि। भवतः स्नेहपूर्णमार्गदर्शनेन मया संस्कृतविद्यायाः स्नातकाध्ययनं सम्पन्नम्। भवता केवलं शास्त्रज्ञानमेव न प्रदत्तम्, अपितु संस्काराः, अनुशासनम्, विनयः, कर्तव्यनिष्ठा च मम जीवने प्रतिष्ठापिताः। भवतः उपदेशाः प्रेरणाश्च अद्यापि मम जीवनमार्गस्य प्रकाशस्तम्भाः भगवतः वेदव्यासस्य कृपया भवतः दीर्घमायुः, आरोग्यं, यशः, कीर्तिः च निरन्तरं वर्धेत। भवतः कृपाशीर्वादः मयि सदैव अविरतं वर्षतु, इति मम प्रार्थना। भवतः श्रीचरणारविन्दयोः सादरं कोटिशः प्रणामाः।

— भवतः कृतज्ञः शिष्यः,सत्येन्द्र पाठकः